# ॥ વૈકૃતિકં રહસ્યમ્ ॥

.. vaikRitikaM rahasyam ..

sanskritdocuments.org

September 11, 2017

# .. vaikRitikaM rahasyam ..

# ॥ વૈકૃતિકં રહસ્યમ્ ॥

## Sanskrit Document Information

Text title : vaikRitikarahasyam

File name : vaikRitikarahasyam.itx

Category : devii

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Source : mArkaNDeyapurANa

Latest update : March 22, 2017

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 11, 2017

*sanskritdocuments.org*

શ્રીગણેશાય નમઃ ॥

ઋષિરુવાચ ।
ત્રિગુણા તામસી દેવી સાત્ત્વિકી યા ત્વયોદિતા ।
સા શર્વા ચણ્ડિકા દુર્ગા ભદ્રા ભગવતીર્યતે ॥ ૧॥

યોગનિદ્રા હરેરુક્તા મહાકાલી તમોગુણા ।
મધુકૈટભનાશાર્થં યાં તુષ્ટાવામ્બુજાસનઃ ॥ ૨॥

દશવક્ત્રા દશભુજા દશપાદાઞ્જનપ્રભા ।
વિશાલયા રાજમાના ત્રિંશલ્લોચનમાલયા ॥ ૩॥

સ્ફુરદ્દશનદંષ્ટ્રા સા ભીમરૂપાપિ ભૂમિપ ।
રૂપસૌભાગ્યકાન્તીનાં સા પ્રતિષ્ઠાં મહાશ્રિયામ્ ॥ ૪॥

ખડ્ગબાણગદાશૂલશઙ્ખચક્રભુશુડિભૃત્ ।
પરિઘં કાર્મુકં શીર્ષં નિશ્ચોતદ્રુધિરં દધૌ ॥ ૫॥

એષા સા વૈષ્ણવી માયા મહાકાલી દુરત્યયા ।
આરાધિતા વશીકુર્યાત્પૂજાકર્તુશ્ચરાચરમ્ ॥ ૬॥

સર્વદેવશરીરેભ્યો યાऽऽવિર્ભૂતાऽમિતપ્રભા ।
ત્રિગુણા સા મહાલક્ષ્મીઃ સાક્ષાન્મહિષમર્દિની ॥ ૭॥

શ્વેતાનના નીલભુજા સુશ્વેતસ્તનમણ્ડલા ।
રક્તમધ્યા રક્તપાદા રક્તજઙ્ઘોરુરુન્મદા ॥ ૮॥

સુચિત્રજઘના ચિત્રમાલ્યામ્બરવિભૂષણા ।
ચિત્રાનુલેપના કાન્તિરૂપસૌભાગ્યશાલિની ॥ ૯॥

અષ્ટાદશભુજા પૂજ્યા સા સહસ્રભુજા સતી ।
આયુધાન્યત્ર વક્ષ્યન્તે દક્ષિણાધઃકરક્રમાત્ ॥ ૧૦॥

અક્ષમાલા ચ કમલં બાણોऽસિઃ કુલિશં ગદા ।
ચક્રં ત્રિશૂલં પરશુઃ શઙ્ખો ઘણ્ટા ચ પાશકઃ ॥ ૧૧॥

શક્તિર્દણ્ડશ્ચર્મ ચાપં પાનપાત્રં કમણ્ડલુઃ ।
અલઙ્કૃતભુજામેભિરાયુધૈઃ કમલાસનામ્ ॥ ૧૨॥

સર્વદેવમયીમીશાં મહાલક્ષ્મીમિમાં નૃપ ।

પૂજયેત્સર્વલોકાનાં સ દેવાનાં પ્રભુર્ભવેત્ ॥ ૧૩॥

ગૌરીદેહાત્સમુદ્ભૂતા યા સત્ત્વૈકગુણાશ્રયા ।
સાક્ષાત્સરસ્વતી પ્રોક્તા શુમ્ભાસુરનિબર્હિણી ॥ ૧૪॥

દધૌ ચાષ્ટભુજા બાણાન્મુસલં શૂલચક્રભૃત્ ।
શઙ્ખં ઘણ્ટાં લાઙ્ગલં ચ કાર્મુકં વસુધાધિપ ॥ ૧૫॥

એષા સમ્પૂજિતા ભક્ત્યા સર્વજ્ઞત્વં પ્રયચ્છતિ ।
નિશુમ્ભમથિની દેવી શુમ્ભાસુરનિબર્હિણી ॥ ૧૬॥

ઇત્યુક્તાનિ સ્વરૂપાણિ મૂર્તીનાં તવ પાર્થિવ ।
ઉપાસનં જગન્માતુઃ પૃથગાસાં નિશામય ॥ ૧૭॥

મહાલક્ષ્મીર્યદા પૂજ્યા મહાકાલી સરસ્વતી ।
દક્ષિણોત્તરયોઃ પૂજ્યે પૃષ્ઠતો મિથુનત્રયમ્ ॥ ૧૮॥

વિરઞ્ચિઃ સ્વરયા મધ્યે રુદ્રો ગૌર્યા ચ દક્ષિણે ।
વામે લક્ષ્મ્યા હૃષીકેશઃ પુરતો દેવતાત્રયમ્ ॥ ૧૯॥

અષ્ટાદશભુજા મધ્યે વામે ચાસ્યા દશાનના ।
દક્ષિણેઽષ્ટભુજા લક્ષ્મીર્મહતીતિ સમર્ચયેત્ ॥ ૨૦॥

અષ્ટાદશભુજા ચૈષા યદા પૂજ્યા નરાધિપ ।
દશાનના ચાષ્ટભુજા દક્ષિણોત્તરયોસ્તદા ॥ ૨૧॥

કાલમૃત્યૂ ચ સમ્પૂજ્યૌ સર્વારિષ્ટપ્રશાન્તયે ।
યદા ચાષ્ટભુજા પૂજ્યા શુમ્ભાસુરનિબર્હિણી ॥ ૨૨॥

નવાસ્યાઃ શક્તયઃ પૂજ્યાસ્તદા રુદ્રવિનાયકૌ ।
નમો દેવ્યા ઇતિ સ્તોત્રૈર્મહાલક્ષ્મીં સમર્ચયેત્ ॥ ૨૩॥

અવતારત્રયાર્ચાયાં સ્તોત્રમન્ત્રાસ્તદાશ્રયાઃ ।
અષ્ટાદશભુજા ચૈષા પૂજ્યા મહિષમર્દિની ॥ ૨૪॥

મહાલક્ષ્મીર્મહાકાલી સૈવ પ્રોક્તા સરસ્વતી ।
ઈશ્વરી પુણ્યપાપાનાં સર્વલોકમહેશ્વરી ॥ ૨૫॥

મહિષાન્તકરી યેન પૂજિતા સ જગત્પ્રભુઃ ।
પૂજયેજ્જગતાં ધાત્રીં ચણ્ડિકાં ભક્તવત્સલામ્ ॥ ૨૬॥

અર્ઘાદિભિરલઙ્કારૈર્ગન્ધપુષ્પૈસ્તથોત્તમૈઃ ।
ધૂપૈર્દીપૈશ્ચ નૈવેદ્યૈર્નાનાભક્ષ્યસમન્વિતૈઃ ॥ ૨૭॥

રુધિરાક્તેન બલિના માંસેન સુરયા નૃપ ।
પ્રણામાચમનીયેન ચન્દનેન સુગન્ધિના ॥ ૨૮॥

સકર્પૂરૈશ્ચ તામ્બૂલૈર્ભક્તિભાવસમન્વિતૈઃ ।
વામભાગેઽગ્રતો દેવ્યાશ્છિન્નશીર્ષં મહાસુરમ્ ॥ ૨૯॥

પૂજયેન્મહિષં યેન પ્રાપ્તં સાયુજ્યમીશયા ।
દક્ષિણે પુરતઃ સિંહં સમગ્રં ધર્મમીશ્વરમ્ ॥ ૩૦॥

વાહનં પૂજયેદ્દેવ્યા ધૃતં યેન ચરાચરમ્ ।
તતઃ કૃતાઞ્જલિર્ભૂત્વા સ્તુવીત ચરિતૈરિમૈઃ ॥ ૩૧॥

એકેન વા મધ્યમેન નૈકેનેતરયોરિહ ।
ચરિતાર્ધં તુ ન જપેજ્જપઞ્છિદ્રમવાપ્નુયાત્ ॥ ૩૨॥

સ્તોત્રમન્ત્રૈઃ સ્તુવીતેમાં યદિ વા જગદમ્બિકામ્ ।
પ્રદક્ષિણાનમસ્કારાન્કૃત્વા મૂર્ધ્નિ કૃતાઞ્જલિઃ ॥ ૩૩॥

ક્ષમાપયેજ્જગદ્ધાત્રીં મુહુર્મુહુરતન્દ્રિતઃ ।
પ્રતિશ્લોકં ચ જુહુયાત્પાયસં તિલસર્પિષા ॥ ૩૪॥

જુહુયાત્સ્તોત્રમન્ત્રૈર્વા ચણ્ડિકાયૈ શુભં હવિઃ ।
નમોનમઃપદૈર્દેવીં પૂજયેત્સુસમાહિતઃ ॥ ૩૫॥

પ્રયતઃ પ્રાઞ્જલિઃ પ્રહ્વઃ પ્રાણાનારોપ્ય ચાત્મનિ ।
સુચિરં ભાવયેદ્દેવીં ચણ્ડિકાં તન્મયો ભવેત્ ॥ ૩૬॥

એવં યઃ પૂજયેદ્ભક્ત્યા પ્રત્યહં પરમેશ્વરીમ્ ।
ભુક્ત્વા ભોગાન્ યથાકામં દેવીસાયુજ્યમાપ્નુયાત્ ॥ ૩૭॥

યો ન પૂજયતે નિત્યં ચણ્ડિકાં ભક્તવત્સલામ્ ।
ભસ્મીકૃત્યાસ્ય પુણ્યાનિ નિર્દહેત્પરમેશ્વરી ॥ ૩૮॥

તસ્માત્પૂજય ભૂપાલ સર્વલોકમહેશ્વરીમ્ ।
યથોક્તેન વિધાનેન ચણ્ડિકાં સુખમાપ્સ્યસિ ॥ ૩૯॥

ઇતિ શ્રીમાર્કણ્ડેયપુરાણે સૂર્યસાવર્ણિકે મન્વન્તરે દેવીમાહાત્મ્યે
વૈકૃતિકં રહસ્યં સમ્પૂર્ણમ્ ॥ અધ્યાય ૧૫

See also prAdhAnikarahasyam and mUrtirahasyam

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

.. vaikRitikaM rahasyam ..

Searchable pdf was typeset using generateactualtext feature of XƎLATEX 0.99996

on September 11, 2017

Please send corrections to *sanskrit@cheerful.com*